# Shri Vamadeva Kavacham

# શ્રીવિશ્વમઙ્ગલં શ્રીવામદેવકવચમ્

## Document Information

Text title : vAmadevakavacham

File name : vAmadevakavacham.itx

Category : shiva, kavacha

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Easwaran psaeaswaran at gmail.com

Latest update : March 8, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2020

*sanskritdocuments.org*

# શ્રીવિશ્વમઙ્ગલં શ્રીવામદેવકવચમ્

ૐ શ્રીગણેશાય નમઃ ।
ૐ શ્રીદેવ્યૈ સદાસુફલદાયિન્યૈ નમઃ ।
શ્રીભૈરવ ઉવાચ -
અથ વક્ષ્યામિ દેવેશિ કવચં મન્ત્રગર્ભકમ્ ।
મૂલમન્ત્રસ્વરૂપં ચ વિશ્વમઙ્ગલકાભિધમ્ ॥ ૧॥

સર્વસમ્પત્પ્રદં ચૈવ વામદેવસ્ય પાર્વતિ ।
ગુહ્યાતિગુહ્યં પરમં મૂલવિદ્યામયં ધ્રુવમ્ ॥ ૨॥

પરમાર્થપ્રદં નિત્યં ભોગમોક્ષૈકકારણમ્ ।
મહાભયહરં દેવિ મહૈશ્વર્યપ્રદં શિવે ॥ ૩॥

કવચસ્યાસ્ય દેવેશિ ઋષિર્ભૈરવ ઈરિતઃ ।
અનુષ્ટુપ્છન્દ ઇત્યુક્તં વામદેવશ્ચ દેવતા ॥ ૪॥

ઇન્દ્રો બીજં પરાશક્તિઃ તારં કીલકમીરિતમ્ ।
ધર્માર્થકામમોક્ષાર્થવિનિયોગ ઇતીરિતઃ ॥ ૫॥

અસ્ય શ્રીવામદેવકવચસ્ય ભૈરવઋષિઃ, અનુષ્ટુપ્છન્દઃ, શ્રીવામદેવોદેવતા ।
ઇન્દ્રો બીજં, પરાશક્તિઃ, તારં કીલકમ્મ્ ।
ધર્માર્થકામમોક્ષાર્થે કવચપાઠે વિનિયોગઃ ।
ભૈરવઋષયે નમઃ - શિરસિ । અનુષ્ટુપ્છન્દસે નમઃ - મુખે ।
શ્રીવામદેવદેવતાયૈ નમઃ - હૃદિ । ઇન્દ્રો બીજાય નમો - ગુહ્યે ।
પરાશક્તયે નમઃ - પાદયોઃ । તારં કીલકાય નમઃ - નાભૌ ।
કવચપાઠે વિનિયોગઃ - સર્વાઙ્ગે ।
અથ ધ્યાનમ્ ।
વરાક્ષમાલાઽભયઢક્કહસ્તઃ સરોજકિઞ્જલ્કસમાનવર્ણઃ ।
ત્રિલોચનશ્ચારુચતુર્મુખો માં પયાદુદીચ્યાં દિશિ વામદેવઃ ॥

ૐ વાં શિરઃ પાતુ મે દેવો લલાટં હ્રીં સદા મમ ।
વામદેવઃ પ્રદેશં મે બીજદ્વયસ્વરૂપિણમ્ ॥ ૧॥

હું પાતુ લોચનદ્વન્દ્વં મુખં હ્રીં બીજરૂપિણમ્ ।
હ્રીઙ્કારો કણ્ઠદેલં હ્રીં પાતુ સ્કન્ધયોર્મમ ॥ ૨॥

વામદેવો સદા પાતુ ભુજૌ સવ્યેતરૌ મમ ।
હ્રીઙ્કારો હૃદયં પાતુ હ્રીં સોઽવ્યાદુદરં મમ ॥ ૩॥

હ્રીં નાભૌ પાતુ સતતં દેવો હ્રિઙ્કારરૂપકઃ ।
અવ્યાન્મે લિઙ્ગદેશં ચ હ્રિં રક્ષેદ્ગુદદેશકે ॥ ૪॥

ચન્દ્રબીજં પાતુ પાદૌ નમઃ પાદતલં મમ ।
દશાક્ષરઃ પાતુ નિત્યં સર્વાઙ્ગં મમ સર્વદા ॥ ૫॥

અન્તર્બહિશ્ચ માં પાતુ વામદેવશ્ચ ભૈરવઃ ।
ભગલિઙ્ગામૃતપ્રીતો સર્વસન્ધિષુ રક્ષતુ ॥ ૬॥

શઙ્કરો માં સદા પાતુ મમેન્દ્રિયસમાનકમ્ ।
શિવો મમેન્દ્રિયાર્થેષુ રક્ષયેદખિલેષ્વપિ ॥ ૭॥

વામદેવઃપશ્ચિમેઽવ્યાદક્ષિણે દેવદત્તકઃ ।
ભગલિઙ્ગામૃતપ્રીતો ભગલિઙ્ગસ્વરૂપકઃ ॥ ૮॥

ઉદીચ્યામૂર્ધ્વગઃ પાતુ પૂર્વે સંહારભૈરવઃ ।
દિગમ્બરઃ શ્મશાનસ્થઃ પાતુ દિક્ષુ વિદિક્ષુ ચ ॥ ૯॥

ઘોરરાવાટ્ટાટ્ટહાસો મે શિવો ત્વં સુશોભિતઃ ।
પાતુ વિઘ્નેષુ ઘોરેષુ જગદ્રુધિરભક્ષકઃ ॥ ૧૦॥

કરાલવદનો ઘોરઃ પ્રેતકોલાહલપ્રિયઃ ।
મુક્તકેશઃ સુકેશશ્ચ મદિરોન્મત્તભૈરવઃ ॥ ૧૧॥

દેવદત્તો મહોગ્રશ્ચ સદાશ્મશાનગઃ પરઃ ।
શિરસઃ પાદપર્યન્તં દેવદત્તોઽવતાત્સદા ॥ ૧૨॥

ઇતીદં કવચં દિવ્યં સાધકાનાં સુદુર્લભમ્ ।
મન્ત્રસિદ્ધિકરં સાક્ષાન્મહાદેવસ્ય ભાષિતમ્ ॥ ૧૩॥

ઇદં કવચમજ્ઞાત્વા યોજયેદ્વામદેવકઃ ।
શતલક્ષપ્રજપ્તોઽપિ તસ્ય દેવો ન સિદ્ધ્યતે ॥ ૧૪॥

સ શસ્ત્રઘાતમાપ્નોતિ સોઽચિરન્મૃતુમાપ્નુયાત્ ।
મન્ત્રેણ મ્રિયતે યોગી રક્ષયેત્ કવચં પરમ્ ॥ ૧૫॥

ત્રિસન્ધ્યં પઠનાદસ્ય કવચસ્ય તુ પાર્વતિ ।
સિદ્ધયોઽષ્ટૌ કરે તસ્ય મહેશ ઇવ ચાપરઃ ॥ ૧૬॥

રૂપેણ સ્મરતુલ્યોઽસૌ કામિનીનાં પ્રિયો ભવેત્ ।
તસ્માદેતત્સુકવચં ન દેયં યસ્યકસ્યચિત્ ।
ભક્તિયુક્તાય શાન્તાય દાનશીલાય ધીમતે ॥ ૧૭॥

યો દદાતિ સુશિષ્યેભ્યસ્તસ્ય વશ્યં જગદ્ભવેત્ ।
ગુહ્યાદ્ગુહ્યતરં ગુહ્યં મહારુદ્રેણ ભાષિતમ્ ॥ ૧૮॥

યસ્ય કણ્ઠગતં તસ્ય કરસ્થાઃ સર્વસિદ્ધયઃ ।
શ્રીવિશ્વમઙ્ગલં નામ કવચં ન પ્રકાશયેત્ ।
રહસ્યાતિરહસ્યં ચ ગોપનીયં સ્વયોનિવત્ ॥ ૧૯॥

ઇતિ શ્રીરુદ્રયામલેતન્ત્રે શ્રીવિશ્વમઙ્ગલં નામ વામદેવકવચં સમ્પૂર્ણમ્ ॥

Encoded by Sivakumar Thyagarajan

Proofread by Sivakumar Thyagarajan, PSA Easwaran

*Shri Vamadeva Kavacham*

pdf was typeset on March 8, 2020

Please send corrections to *sanskrit@cheerful.com*